# Yajnavalkyaproktam Shivaradhanamahimanuvarnanam

# યાજ્ઞવલ્ક્યપ્રોક્તં શિવારાધનમહિમાનુવર્ણનમ્

## Document Information

Text title : Yajnavalkyaproktam Shivaradhanamahimanuvarnanam 2

File name : yAjnavalkyaproktaMshivArAdhanamahimAnuvarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 38 | 34-56 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# યાજ્ઞવલ્ક્યપ્રોક્તં શિવારાધનમહિમાનુવર્ણનમ્

મહાદેવઃ પરો દેવો મહાદેવઃ પરાત્પરઃ ।
મહાદેવઃ પરં જ્ઞાનં મહાદેવો મહાનતઃ ॥ ૩૪॥

મહાદેવરતસ્તાવન્મહાત્મા મહતામપિ ।
સેવનીયઃ પ્રયત્નેન મહાદેવમનોહરઃ ॥ ૩૫॥

મહાદેવવિહારાણાં સ્થલં શામ્ભવમાનસમ્ ।
અતઃ સ પૂજ્યઃ સતતં શામ્ભવઃ શિવતત્પરઃ ॥ ૩૬॥

શિવાભિમાનસ્થલમેકમેવ તદેતદેકાન્તશિવાર્ચકસ્ય ।
શિવાર્ચકાદપ્યધિ કોઽસ્તિ લોકે યતઃ સ એવાપ્રતિમપ્રભાવઃ ॥ ૩૭॥

તં ભાવમેવાપ્રતિમપ્રભાવં મન્યે સુરાણામપિ સેવનીયમ્ ।
સ એવ મૃત્યુણઞ્જયપૂજનેન ધન્યોઽપિ માન્યોઽપિ મહાનુભાવઃ ॥ ૩૮॥

યો યસ્તિષ્ઠતિ શાઙ્કરો ભુવિ સ મે પૂજ્યઃ સ પૂજાર્હતાં
પ્રાપ્તઃ શઙ્કરપૂજયા સુરગણાસ્તત્પૂજનૈઃ પાવનાઃ ।
તત્પાદપ્રણતાસ્તદઙ્ઘ્રિજરજોલેશપ્રસાદં પરં
વાઞ્છત્યેવ સુધાં સુધામપિ મુહુસ્ત્યક્ત્વા વૃથેત્યાદરાત્ ॥ ૩૯॥

કાલાદ્ભીતિઃ કાલકાલાર્ચનેન નાભૂદ્ભીતઃ પ્રત્યુતાસ્માદ્યમોઽપિ ।
તસ્માત્ કો વા કાલકાલાન્યદેવં મોહાદ્ધાતું પૂજિતું વા પ્રમત્તઃ ॥ ૪૦॥

પ્રવૃત્તિરીશાન્યસુરાર્ચનેષુ ન સ્યાચ્છિવારાધનતત્પરાણામ્ ।
યસ્માચ્છિવાન્યામરરૂપબુદ્ધિઃ હાનાય તાવદ્ભવતીતિ મન્યે ॥ ૪૧॥

અસદ્વસ્તુહાનાય તે વસ્તુબુદ્ધિઃ પ્રવૃદ્ધાપિ તત્કાર્યહેતુઃ સ્વતઃ સ્યાત્ ।
ઉપાદાનમપ્યસ્તિ સદ્દાનવૃદ્ધ્યા સદિત્યેવ બુદ્ધિઃ શિવબ્રહ્મણીતિ ॥ ૪૨॥

યદ્બ્રહ્મ તત્તાવદુમાસહાયસ્વરૂપમાસાદ્ય હૃદિ પ્રવિષ્ટમ્ ।
કષ્ટાનિ દુષ્ટાનિ નિરાકરોતિ તત્કષ્ટનાશાય યતઃ પ્રવૃત્તમ્ ॥ ૪૩॥

અશિવાર્ચનભાવનાનિવૃત્તિર્યદિ જાતા બહુપુણ્યસઞ્જયૈઃ ।
શિવ એવ સદા વિચિન્તનીયો મનસઃ સૃષ્ટિરપીશ પૂજનીયા ॥ ૪૪॥

મનો મહેશેન યદા પ્રકૃષ્ટં સૃષ્ટં તદા તસ્ય શિવાર્ચનેન ।
ગતા ભવત્યેવ સ કાલવાર્તા કિં કાલકાલપ્રવણસ્ય તસ્ય ॥ ૪૫॥

કાલાન્તકારાધકપાદુકાર્ચચર્ચાપિ વર્ચશ્ચિરમાતનોતિ ।
તેનૈવ પાપૌઘલયોઽપિ તેન સ્વર્ગોઽપિ મુક્તિશ્ચ ભવત્યવશ્યમ્ ॥ ૪૬॥

અહો વદન્તિ પ્રમથાધિનાથાઃ કૃત્વા કથઞ્ચિદ્ગિરિશાર્ચનાનિ ।
ધન્યાઃ પરં શઙ્કરપૂજનેન નયન્તિ તાવદ્દિવસાનપીતિ ॥ ૪૭॥

ઇદં પરં ભાગ્યમિતિ સ્મરન્તઃ સંસારવાર્તામપિ વિસ્મરન્તઃ ।
મહેશનામાનિ સદા જપન્તઃ શિવાલયેષુ પ્રચરન્તિ સન્તઃ ॥ ૪૮॥

સન્તસ્તાવત્સન્તતં સામ્બમીશં સ્મૃત્વા સ્મૃત્વા દેવદેવં ચ મત્વા ।
દત્વા ચિત્તં શઙ્કરે સાધુ નત્વા કૃત્વા પૂજાં યાન્તિ સામ્બં મહેશમ્ ॥ ૪૯॥

અપર્ણાસ્મણં મત્વા કૃપાર્ણવમનામયમ્ ।
મહામૃત્યુઞ્જયં શૈવાઃ પૂજયન્તિ પ્રયત્નતઃ ॥ ૫૦॥

કઃ શામ્ભવેન સદૃશસ્તત્વજ્ઞો ન ભવિષ્યતિ ।
તેન તત્વં યથા જ્ઞાતં તથાઽન્યેન ન બુદ્ધ્યતે ॥ ૫૧॥

શિવં શિવઙ્કરત્વેન જ્ઞાત્વા કેવલમવ્યયમ્ ।
સર્વમન્યત્પરિત્યજ્ય નિરાતઙ્કોઽધિતિષ્ઠતિ ॥ ૫૨॥

મહદ્ભાગ્યમિતિ જ્ઞાતં શામ્ભવં જન્મ કેવલમ્ ।
જન્મનામુત્તમં જન્મ શામ્ભવં તત્કિલોત્તમમ્ ॥ ૫૩॥

શામ્ભવં જન્મ સમ્પ્રાપ્ય શમ્ભુપૂજાં કરોતિ યઃ ।
સ એવ ધન્યઃ શ્રેષ્ઠશ્ચ વરિષ્ઠોઽપિ વિશેષતઃ ॥ ૫૪॥

સર્વકષ્ટવિનાશાય શિપિવિષ્ટાર્ચને રતાઃ ।
ભવન્તિ બહવો લોકે મુક્તાસ્તે સર્વથા ધ્રુવમ્ ॥ ૫૫॥

શિવસ્મરણમાત્રેણ જીવન્મુક્તો ભવેન્નરઃ ।
શિવશબ્દોચ્ચારણેન દેવપૂજ્યો ભવિષ્યતિ ॥ ૫૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે યાજ્ઞવલ્ક્યપ્રોક્તં શિવારાધનમહિમાનુવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૩૮। ૩૪-૫૬ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 38. 34-56 ..

Proofread by Ruma Dewan

---

*Yajnavalkyaproktam Shivaradhanamahimanuvarnanam*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*